# वैयाकरणसिद्धान्तकौमुदी

## हलन्तपुंलिङ्गप्रकरणम् (५)

०८.०८.२०११

# मकारान्तः पुंलिङ्गः 'इदम्' शब्दः

- 'सर्वादीनि सर्वनामानि' इति सर्वनामसंज्ञा ।
- सर्व, विश्व....[[त्यद्, तद्, यद्, एतद्, इदम्, अदस्, एक, द्वि,]] एक, द्वि, युष्मद्, अस्मद्, भवतु, किम् ।
- त्यदादिषु अन्तर्भावात् त्यदाद्यन्तर्गणकार्यमपि प्राप्नोति ।

- इदम् (सुँ) स्

# ३४३. इदमो मः (७.२.१०८)

- पदद्वयम् । इदमः, मः ।
- 'तदोः सः सावनन्त्ययोः' (७.२.१०६) इत्यतः 'सौ' इति अनुवर्तते ।
- इदमो मस्य मः स्यात् सौ परे ।
- त्यदाद्यत्वापवादः ।

- इदम्  स् ('इदमो मः' इति मस्य मः)

# ३४४. इदोऽय् पुंसि (७.२.१११)

- पदत्रयम् । इदः, अय्, पुंसि ।
- ‘इदमो मः’ (७.२.१०८) इत्यतः ‘इदमः’ इति, ‘यः सौ’ (७.२.११०) इत्यतः ‘सौ’ इति च अनुवर्तते ।
- इदमः इदः अय् स्यात् सौ पुंसि ।

- इदम् स्
- अयम् स्  (‘इदोऽय् पुंसि’ - ७.२.१११)
- अयम्  (‘हल्ङ्याब्भ्यो...’ - ६.१.६८)

- इदम्  औ
- त्यदाद्यत्वं पररूपं च ।
- इद अ औ  (‘त्यदादीनामः’ - ७.२.१०२)
- इद        औ  (‘अतो गुणे’ - ६.१.९७ - इति पररूपम्)

# ३४५. दश्च (७.२.१०९)

- पदद्वयम् । दः, च ।
- ’अष्टन आ विभक्तौ’ (७.२.८४) इत्यतः ‘विभक्तौ’ इति, ‘इदमो मः’ (७.२.१०८) इति च अनुवर्तते ।
- इदमः दस्य मः स्याद् विभक्तौ ।

- इद  औ
- इम  औ  (‘दश्च’ इति दस्य मः)
- इमौ  (‘वृद्धिरेचि’ - ६.१.८८)

- इदम्  (जस्) अस्
- इद अ    अस्  ('त्यदादीनामः' - ७.२.१०२)
- इद        अस्  ('अतो गुणे' - ६.१.९७)
- इद   (शी) ई    ('जसः शी' - ७.१.१७ - इति शी)
- इम   ई          ('दश्च' - ७.२.१०९ - इति दस्य मः)
- इमे              ('आद्गुणः' - ६.१.८७)

- त्यदादेः सम्बोधनं नास्ति इत्युत्सर्गः ।

- इदम्  अम्
- इद अ    अम्  (‘त्यदादीनामः’ - ७.२.१०२)
- इद    अम्  (‘अतो गुणे’ - ६.१.९७)
- इम    अम्  (‘दश्च’ - ७.२.१०९ - इति दस्य मः)
- इमम्    (‘अमि पूर्वः’ - ६.१.१०७)

- इमौ

- इदम्  (शस्) अस्
- इद अ    अस्  ('त्यदादीनामः' - ७.२.१०२)
- इद        अस्  ('अतो गुणे' - ६.१.९७)
- इम        अस्   ('दश्च' - ७.२.१०९ - इति दस्य मः)
- इमास्         ('प्रथमयोः पूर्वसवर्णः' - ६.१.१०२)
- इमान्         ('तस्माच्छसो नः पुंसि' - ६.१.१०३)

# ३४६. अनाप्यकः

- पदत्रयम् । अन्, आपि, अकः ।
- ‘अष्टन आ विभक्तौ’ (७.२.८४) इत्यतः ‘विभक्तौ’ इति, ‘इदमो मः’ (७.२.१०८) इत्यतः ‘इदमः’ इति, ‘इदोऽय् पुंसि’ इत्यतः ‘इदः’ इति च अनुवर्तते ।
- अककारस्य इदमः इदः अन् स्याद् आपि विभक्तौ ।
- आप् इति टा इत्यारभ्य सुपः पकारेण प्रत्याहारः ।

- इदम्  (टा) आ
- इद अ   आ  ('त्यदादीनामः' - ७.२.१०२)
- इद        आ  ('अतो गुणे' - ६.१.९७)
- अन       आ  ('अनाप्यकः' - ७.२.१०२)
- अन       इन   ('टाङसिङसामिनात्स्याः' - ७.१.१२)
- अनेन                              ('आद्गुणः' - ६.१.८७)

# ३४७. हलि लोपः (७.२.११३)

- पदद्वयम् । हलि, लोपः ।
- ‘अष्टन आ विभक्तौ’ (७.२.८४) इत्यतः ‘विभक्तौ’ इति, ‘इदमो मः’ (७.२.१०८) इत्यतः ‘इदमः’ इति, ‘इदोऽय् पुंसि’ इत्यतः ‘इदः’ इति, ‘अनाप्यकः’ (७.२.११२) इत्यतः ‘अकः’ इति च अनुवर्तते ।
- अककारस्य इदमः इदः लोपः स्याद् आपि हलादौ ।

# ‘नानर्थकेऽलोऽन्त्यविधिरनभ्यासविकारे (वा)

- न अनर्थके अलोऽन्त्यविधिः अनभ्यासविकारे ।
- अभ्यासविकारं विहाय अन्यत्र अनर्थकस्य शब्दस्वरूपस्य विधौ अलोऽन्त्यस्य इति परिभाषा न प्रवर्तते ।
- अत्र ‘हलि लोपः’ इति इदम्-शब्दस्य एकदेशस्य अनर्थकस्य इदः लोपो विहितः । सः लोपः कृत्स्नस्य इदः भवेद्, उत अन्त्यस्य दकारमात्रस्य? इति प्रश्ने, अनेन वार्तिकेन कृत्स्नस्यैव भवति ।

- इदम्  भ्याम्
- इद अ   भ्याम्  ('त्यदादीनामः' - ७.२.१०२)
- इद       भ्याम्  ('अतो गुणे' - ६.१.९७)
- अ     भ्याम्     ('हलि लोपः' - ७.२.११३ - इति इदः लोपः)
  - 'सुपि च' इत्यनेन अदन्तस्य अङ्गस्य दीर्घः स्याद् यञादौ सुपि इति अकारान्तस्य दीर्घः विहितः। केवलस्य अकारस्य दीर्घो भवति वा?

# ३४८. आद्यन्तवदेकस्मिन् (१.१.२१)

- पदद्वयम् । आद्यन्तवद्, एकस्मिन् ।
- एकस्मिन् क्रियमाणं कार्यम् आदाविव अन्त इव च स्यात् ।

- तेन केवलस्य अकारस्यापि दीर्घः ।
- आभ्याम् (‘सुपि च’ - ७.३.१०२ - इति दीर्घः)

- इदम्  भिस्
- इद अ   भिस् (‘त्यदादीनामः’ - ७.२.१०२)
- इद       भिस् (‘अतो गुणे’ - ६.१.९७)
- अ      भिस्    (‘हलि लोपः’ - ७.२.११३ - इति इदः लोपः)
  - ‘अतो भिस ऐस्’ इति ऐस्त्वे प्राप्ते,

# ३४९. नेदमदसोरकोः (७.१.११)

- पदत्रयम् । न, इदम्-अदसोः, अकोः ।
- 'अतो भिस ऐस्' (७.१.९) इति अनुवर्तते ।
- अककारयोः इदम्-अदसोः भिसः ऐस् न स्यात् ।
- एत्वम्, एभिः ।

- अ भिस्
- एभिस्   ('बहुवचने झल्येत्' - ७.३.१०३ - इति एत्वम्)
- एभिः   (रुत्व-विसर्गौ)

- अत्वम्, नित्यत्वाद् ङेः स्मै, पश्चाद्धलि लोपः ।
- इदम्  (ङे) ए
- इद अ   ए (‘त्यदादीनामः’ - ७.२.१०२)
- इद       ए (‘अतो गुणे’ - ६.१.९७)
  - अत्र ‘अनाप्यकः’ (७.२.१११) इति अनादेशः करणीयो वा, ‘सर्वनाम्नः स्मै’ (७.१.१४) इति स्मायादेशः करणीयो वा इति प्रश्नः ।
  - अनादेशे कृते अकृते च स्मै प्रवर्तते ।
  - स्मायादेशे अकृते अनादेशो भवति । किन्तु स्मायादेशे कृते तस्य हलादित्वात् ‘हलि लोपः’ इत्यनेन अनादेशः बाध्यते ।
  - तस्माद् अनादेशः अनित्यः, स्मायादेशः नित्यः ।

- इद स्मै ('सर्वनाम्नः स्मै' - ७.१.१४)
- अ स्मै ('हलि लोपः' - ७.२.११३ - इति इदः लोपः)
- अस्मै
- आभ्याम्
- एभ्यः
- अस्मात् आभ्याम् एभ्यः

- इदम्  (ङस्) अस्
- इद अ   अस् ('त्यदादीनामः' - ७.२.१०२)
- इद      अस् ('अतो गुणे' - ६.१.९७)
- इद    स्य   ('टाङसिङसामिनात्स्याः' - ७.१.१२)
- अस्य                  ('हलि लोपः' - ७.२.११३)

- इदम्   ओस्
- इद अ  ओस् (‘त्यदादीनामः’ - ७.२.१०२)
- इद     ओस् (‘अतो गुणे’ - ६.१.९७)
- अन     ओस्  (‘अनाप्यकः’ - ७.२.११२)
- अने     ओस्  (‘ओसि च’ - ७.३.१०४ - इति एत्वम्)
- अनयोस्     (‘एचोऽयवायावः’ - ६.१.७८)
- अनयोः     (‘रुत्व-विसर्गौ’)

- इदम्  आम्
- इद अ   आम् (‘त्यदादीनामः’ - ७.२.१०२)
- इद       आम् (‘अतो गुणे’ - ६.१.९७)
- इद    स् आम्  (‘आमि सर्वनाम्नः सुट्’ - ७.१.५२)
- अ     साम्      (‘हलि लोपः’ - ७.२.११३)
- ए     साम्    (‘बहुवचने झल्येत्’ - ७.३.१०३)
- एषाम्          (‘आदेशप्रत्यययोः’ - ८.३.५९)

- अस्मिन्      अनयोः एषु

# मकारान्तः पुँल्लिङ्गः इदम्-शब्दः

सुप्रत्ययं विहाय सर्वासु विभक्तिषु 'त्यदादीनामः' इति अत्वम्, पररूपम् ।

औङादिषु 'दश्च' इति दकारस्य मकारः

सौ 'इदमो मः' इति मस्य मः । 'इदोऽय् पुंसि' इति अयादेशः

टाप्रभृतिषु अजादिषु 'अनाप्यकः' इति अनादेशः

| | एकवचनम् | द्विवचनम् | |
|---|---|---|---|
| | अयम् | इमौ | इमे |
| | इमम् | इमौ | इमान् |
| | अनेन | आभ्याम् | एभिः |
| | अस्मै | आभ्याम् | एभ्यः |
| | अस्मात् | आभ्याम् | एभ्यः |
| षष्ठीविभक्तिः | अस्य | अनयोः | एषाम् |
| सप्तमीविभक्तिः | अस्मिन् | अनयोः | एषु |

टाप्रभृतिषु हलादिषु 'हलि लोपः'